श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्तविंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तविंशः सर्गः ॥

## सेनासहितस्य रावणस्येन्द्रलोकोपरि समाक्रमणमिन्द्रेण विष्णुं प्रति साहाय्यार्थं प्रार्थनं रावणं भाविनि काले हनिष्यसीति प्रतिज्ञाय विष्णुनेन्द्रस्य निवर्तनं देवैः सह रक्षसां युद्धं वसुना सुमालिनो वधश्च

कैलासं लङ्घयित्वा तु ससैन्यबलवाहनः।
आससाद महातेजा इन्द्रलोकं दशाननः॥ **7.27.1** ॥

तस्य राक्षससैन्यस्य समन्तादुपयास्यतः।
देवलोके बभौ शब्दो भिद्यमानार्णवोपमः॥ **7.27.2** ॥

श्रुत्वा तु रावणं प्राप्तमिन्द्रश्चलित आसनात्।
देवानथाब्रवीत् तत्र सर्वानेव समागतान्॥ **7.27.3** ॥

आदित्यांश्च वसून् रुद्रान् साध्यांश्च समरुद्गणान्।
सज्जा भवत युद्धार्थं रावणस्य दुरात्मनः॥ **7.27.4** ॥

एवमुक्तास्तु शक्रेण देवाः शक्रसमा युधि।
सन्नह्य सुमहासत्त्वा युद्धश्रद्धासमन्विताः॥ **7.27.5** ॥

स तु दीनः परित्रस्तो महेन्द्रो रावणं प्रति।
विष्णोः समीपमागत्य वाक्यमेतदुवाच ह॥ **7.27.6** ॥

विष्णो कथं करिष्यामि रावणं राक्षसं प्रति।
अहोऽतिबलवद् रक्षो युद्धार्थमभिवर्तते॥ **7.27.7** ॥

वरप्रदानाद् बलवान् न खल्वन्येन हेतुना।
तत् तु सत्यं वचः कार्यं यदुक्तं पद्मयोनिना॥ **7.27.8** ॥

तद् यथा नमुचिर्वृत्रो बलिर्नरकशम्बरौ।
त्वद्बलं समवष्टभ्य मया दग्धास्तथा कुरु॥ **7.27.9** ॥

नह्यन्यो देवदेवेश त्वदृते मधुसूदन।
गतिः परायणं चापि त्रैलोक्ये सचराचरे॥ **7.27.10** ॥

त्वं हि नारायणः श्रीमान् पद्मनाभः सनातनः।
त्वयेमे स्थापिता लोकाः शक्रश्चाहं सुरेश्वरः॥ **7.27.11** ॥

त्वया सृष्टमिदं सर्वं त्रैलोक्यं सचराचरम्।
त्वामेव भगवन् सर्वे प्रविशन्ति युगक्षये॥ **7.27.12** ॥

तदाचक्ष्व यथातत्त्वं देवदेव मम स्वयम्।
असिचक्रसहायस्त्वं योत्स्यसे रावणं प्रति॥ **7.27.13** ॥

एवमुक्तः स शक्रेण देवो नारायणः प्रभुः।
अब्रवीन्न परित्रासः कर्तव्यः श्रूयतां च मे॥ **7.27.14** ॥

न तावदेष दुष्टात्मा शक्यो जेतुं सुरासुरैः।
हन्तुं चापि समासाद्य वरदानेन दुर्जयः॥ **7.27.15** ॥

सर्वथा तु महत् कर्म करिष्यति बलोत्कटः।
राक्षसः पुत्रसहितो दृष्टमेतन्निसर्गतः॥ **7.27.16** ॥

यत् तु मां त्वमभाषिष्ठा युध्यस्वेति सुरेश्वर।
नाहं तं प्रतियोत्स्यामि रावणं राक्षसं युधि॥ **7.27.17**॥

नाहत्वा समरे शत्रुं विष्णुः प्रतिनिवर्तते।
दुर्लभश्चैव कामोऽद्य वरगुप्ताद्धि रावणात्॥ **7.27.18**॥

प्रतिजाने च देवेन्द्र त्वत्समीपे शतक्रतो।
भवितास्मि यथास्याहं रक्षसो मृत्युकारणम्॥ **7.27.19**॥

अहमेव निहन्तास्मि रावणं सपुरःसरम्।
देवता नन्दयिष्यामि ज्ञात्वा कालमुपागतम्॥ **7.27.20**॥

एतत् ते कथितं तत्त्वं देवराज शचीपते।
युद्ध्यस्व विगतत्रासः सुरैः सार्धं महाबल॥ **7.27.21**॥

ततो रुद्राः सहादित्या वसवो मरुतोऽश्विनौ।
सन्नद्धा निर्ययुस्तूर्णं राक्षसानभितः पुरात्॥ **7.27.22**॥

एतस्मिन्नन्तरे नादः शुश्रुवे रजनीक्षये।
तस्य रावणसैन्यस्य प्रयुद्धस्य समन्ततः॥ **7.27.23**॥

ते प्रबुद्धा महावीर्या अन्योन्यमभिवीक्ष्य वै।
सङ्ग्राममेवाभिमुखा अभ्यवर्तन्त हृष्टवत्॥ **7.27.24**॥

ततो दैवतसैन्यानां सङ्क्षोभः समजायत।
तदक्षयं महासैन्यं दृष्ट्वा समरमूर्धनि॥ **7.27.25**॥

ततो युद्धं समभवद् देवदानवरक्षसाम्।
घोरं तुमुलनिर्ह्रादं नानाप्रहरणोद्यतम्॥ **7.27.26**॥

एतस्मिन्नन्तरे शूरा राक्षसा घोरदर्शनाः।
युद्धार्थं समवर्तन्त सचिवा रावणस्य ते॥ **7.27.27**॥

मारीचश्च प्रहस्तश्च महापार्श्वमहोदरौ।
अकम्पनो निकुम्भश्च शुकः सारण एव च॥ **7.27.28**॥

संह्रादो धूमकेतुश्च महादंष्ट्रो घटोदरः।
जम्बुमाली महाह्लादो विरूपाक्षश्च राक्षसः॥ **7.27.29**॥

सुप्तघ्नो यज्ञकोपश्च दुर्मुखो दूषणः खरः।
त्रिशिराः करवीराक्षः सूर्यशत्रुश्च राक्षसः॥ **7.27.30**॥

महाकायोऽतिकायश्च देवान्तकनरान्तकौ।
एतैः सर्वैः परिवृतो महावीर्यैर्महाबलः॥ **7.27.31**॥

रावणस्यार्यकः सैन्यं सुमाली प्रविवेश ह।
स दैवतगणान् सर्वान् नानाप्रहरणैः शितैः॥ **7.27.32**॥

व्यध्वंसयत् समं क्रुद्धो वायुर्जलधरानिव।
तद् दैवतबलं राम हन्यमानं निशाचरैः॥ **7.27.33**॥

प्रणुन्नं सर्वतो दिग्भ्यः सिंहनुन्ना मृगा इव।
एतस्मिन्नन्तरे शूरो वसूनामष्टमो वसुः॥ **7.27.34**॥

सावित्र इति विख्यातः प्रविवेश रणाजिरम्।
सैन्यैः परिवृतो हृष्टैर्नानाप्रहरणोद्यतैः॥ **7.27.35**॥

त्रासयञ्शत्रुसैन्यानि प्रविवेश रणाजिरम्।
तथादित्यौ महावीर्यौ त्वष्टा पूषा च तौ समम्॥ **7.27.36**॥

निर्भयौ सह सैन्येन तदा प्राविशतां रणे।
ततो युद्धं समभवत् सुराणां सह राक्षसैः॥ **7.27.37** ॥

क्रुद्धानां रक्षसां कीर्तिं समरेष्वनिवर्तिनाम्।
ततस्ते राक्षसाः सर्वे विबुधान् समरे स्थितान्॥ **7.27.38** ॥

नानाप्रहरणैर्घोरैर्जघ्नुः शतसहस्रशः।
देवाश्च राक्षसान् घोरान् महाबलपराक्रमान्॥ **7.27.39** ॥

समरे विमलैः शस्त्रैरुपनिन्युर्यमक्षयम्।
एतस्मिन्नन्तरे राम सुमाली नाम राक्षसः॥ **7.27.40** ॥

नानाप्रहरणैः क्रुद्धस्तत्सैन्यं सोऽभ्यवर्तत।
स दैवतबलं सर्वं नानाप्रहरणैः शितैः॥ **7.27.41** ॥

व्यध्वंसयत सङ्क्रुद्धो वायुर्जलधरं यथा।
ते महाबाणवर्षैश्च शूलप्रासैः सुदारुणैः॥ **7.27.42** ॥

हन्यमानाः सुराः सर्वे न व्यतिष्ठन्त संहताः।
ततो विद्राव्यमाणेषु दैवतेषु सुमालिना॥ **7.27.43** ॥

वसूनामष्टमः क्रुद्धः सावित्रो वै व्यवस्थितः।
संवृतः स्वैरथानीकैः प्रहरन्तं निशाचरम्॥ **7.27.44** ॥

विक्रमेण महातेजा वारयामास संयुगे।
ततस्तयोर्महद् युद्धमभवल्लोमहर्षणम्॥ **7.27.45** ॥

सुमालिनो वसोश्चैव समरेष्वनिवर्तिनोः।
ततस्तस्य महाबाणैर्वसुना सुमहात्मना॥ **7.27.46** ॥

निहतः पन्नगरथः क्षणेन विनिपातितः।
हत्वा तु संयुगे तस्य रथं बाणशतैश्चितम्॥ **7.27.47** ॥

गदां तस्य वधार्थाय वसुर्जग्राह पाणिना।
ततः प्रगृह्य दीप्ताग्रां कालदण्डोपमां गदाम्॥ **7.27.48** ॥

तां मूर्ध्नि पातयामास सावित्रो वै सुमालिनः।
सा तस्योपरि चोल्काभा पतन्ती विबभौ गदा॥ **7.27.49** ॥

इन्द्रप्रमुक्ता गर्जन्ती गिराविव महाशनिः।
तस्य नैवास्थि न शिरो न मांसं ददृशे तदा॥ **7.27.50** ॥

गदया भस्मतां नीतं निहतस्य रणाजिरे।
तं दृष्ट्वा निहतं सङ्ख्ये राक्षसास्ते समन्ततः॥ **7.27.51** ॥

व्यद्रवन् सहिताः सर्वे क्रोशमानाः परस्परम्।
विद्राव्यमाणा वसुना राक्षसा नावतस्थिरे॥ **7.27.52** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तविंशः सर्गः॥